Postal Regd.No. GAMC- 1553/2019-2021 ISSN 2454-6313

संस्कृत-
# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १४ अङ्क : १६६
मार्च - २०२०

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### अत्र स्थानं नास्ति !

वैदिकी परम्परा भारतस्य पुरातनी संस्कृतिः अस्ति, सम्मर्दः तस्य आधुनिकी संस्कृतिः अस्ति । अवकाशः च दिव्यः स्वप्नः अस्ति । अत्र चिकित्सालयाः रुग्णैः 'समृद्धाः' दृश्यन्ते । सर्वत्र वैद्यानाम् एव दोषः भवति इति न । यत्र सम्मर्दः एव प्राधान्यं भजति तत्र व्यक्तिशः अवेक्षा क्लिष्टतमा भवति । सम्मर्दप्रधाने समाजे जीवनानि अधिकानि वर्तन्ते, किन्तु तेषां संवर्धनं कीटवत् उपेक्षितं भवति ।

भारते सम्मर्दमुक्तं स्थानं दुर्लभम् एव । लोकयानस्थानेषु वर्तमानः लोकसम्मर्दः अशिक्षितानां महासभा इव दृश्यते । शिक्षणवञ्चिताः अस्माकं शिक्षणसंस्थाः यन्त्रगृहाणि इव नानाकार्यक्रमैः अज्ञानस्य विस्तारं कुर्वन्ति । तथैव देवकुलेषु अपि सम्मर्दसंस्कृतिः । भक्तिः सम्मर्दे श्वसितुं न शक्नोति इति प्राथमिकं गणितं मठाधीशान् कः बोधयिष्यति ? कथाकाराणां तु सम्मर्दः व्यसनम् अस्ति । इदानीन्तनाः कथाकाराः आयोजकान् पूर्वतः पृच्छन्ति – 'मण्डपे प्रतिदिनं कति श्रोतारः प्रसादं ग्रहीष्यन्ति ?' एषा मनोदशा सर्वेषु क्षेत्रेषु समाना । यत् चलचित्रं न्यूनाः प्रेक्षकाः पश्यन्ति तत् चित्रपटनिगमे 'फ्लोप' उच्यते । सर्वेषां वस्तूनां महत्त्वं सम्मर्देन तुलयितुम् अस्माकम् अभ्यासः अस्ति । केवलं पुस्तकालयेषु सम्मर्दः न भवति इति शिक्षणक्षेत्रस्य दुर्भाग्यम् अस्ति । अशिक्षितस्य समाजस्य आद्यं लक्षणं किम् ? अस्थाने सम्मर्दः, स्थाने च शून्यता !

सम्मर्देन अधिकः क्लेशः कस्य जायते ? अत्र साधारणजनस्य मर्दनं भवति प्रायः । सामान्यः नागरिकः यथाविहितं करं ददाति । भाटकेन प्रवासं करोति । श्रमार्जितेन धनेन एव आवश्यकवस्तूनि क्रीणाति । अन्यं च अबाधमानः जीवितुं यतते । तथापि तेन सह मनुष्यगौरवसम्पन्नः व्यवहारः क्रियते ? देवालयेषु भगवद्दर्शनार्थं स्थितः सः पङ्क्तेः बहुमानं करोति । किन्तु अपरत्र धनिकवर्गः तत्रत्यान् व्यवस्थापकान् भित्त्वा सुखेन 'साक्षात्कारं' करोति ।

नित्यम् अवमानितः ऋजुः मनुष्यः कालक्रमेण चिन्तयति यत् जगति सर्वं वस्तु सङ्घर्षेण एव लभ्यते । एषा सम्मर्दजन्या सूक्ष्मा हानिः अस्ति । अस्माभिः सदा स्मर्तव्यं यत् व्यक्तिविकासस्य प्रारम्भबिन्दुः एकान्तः अस्ति । एकान्तप्रियः जनः एव जनः अस्ति, शेषं सर्वम् अजाविकम् अस्ति । सम्मर्दमये जीवने किमपि निःशुल्कं न लभ्यते । वणिजः स्मितम् अपि ग्राहकेषु निःस्वार्थं न वितरन्ति । गणिकाः स्मितं कुर्वन्ति, किन्तु तत् कालक्रमेण महार्हं भवति । शान्तिः अपि शुल्केन विना शुष्का भवति । यात्रिकः लोकयाने शान्तिं लब्धुम्, आरोहणकाले महत्याः असान्तेः स्वामी भवति । नो चेत् तत्र पूर्वतः पादौ प्रसार्य उपविष्टाः केचन निर्घृणाः मूर्खाः श्रावयन्ति – 'अन्यत्र गम्यताम्, अत्र स्थानं नास्ति ।' सामान्यः मनुष्यः कुत्रापि प्रविशति, तस्य स्कन्धे खेदपरिपूर्णः स्यूतः लम्बितः भवति । एषा स्थितिः सकलं राष्ट्रं निन्दितुम् अवसरं ददाति ।

सर्वतः पराभूतः जनः कुत्र गच्छेत् ? लोके एकमात्रं निरवद्यं स्थानं वर्तते, तस्य नाम अस्ति मातुः अङ्कः । माता बहुविधां वाचं व्याहरिष्यति, किन्तु एकं वाक्यं कदापि न वदिष्यति – 'अत्र स्थानं नास्ति ।'

## मनुष्यस्य शापः



प्रतापः श्रमजीवी । गृहस्य उद्याने केचन कदलीवृक्षाः आरोपिताः आसन् तेन । यदा कदलीफलानि पक्वानि भवन्ति तदा तानि नगरं नीत्वा तेषां विक्रयणं करोति सः । एकवारं कदलीविक्रयणं क्रियते चेत् शतं रूप्यकाणि प्रायः प्राप्यन्ते तेन । कदाचित् नगरं गत्वा कदलीफलानि विक्रीय गृहं प्रत्यागतं पुत्रं माता उक्तवती – ''कदलीफलानि अद्य अल्पेन एव कालेन विक्रीतानि इति मन्ये'' इति।

प्रतापस्य पत्नी विमला पातुं जलम् आनीय पत्युः हस्ते ददती उक्तवती – ''श्वः पुत्राणां शालायाः शुल्कं दातव्यम्'' इति। ''मासपर्यन्तं कृतस्य परिश्रमस्य फलम् एतानि एव शतं रूप्यकाणि। जीवने कष्टानि न समाप्यन्ते एव। अहो, मम दौर्भाग्यम्'' इति कथयन् प्रतापः आत्मना आनीतं धनं पत्न्याः हस्ते स्थापितवान्।

तदा माता पृष्टवती – ''वत्स ! किम् एतत् ? किमर्थम् एवम् असन्तोषः ?'' इति। ''पित्रा यत् अकार्यं कृतं तत् दृष्ट्वा मया किं सन्तोषः अनुभोक्तव्यः आसीत् ?'' इति क्रोधयुक्तेन स्वरेण पृष्टवान् प्रतापः।

तदा आश्चर्यचकिता माता पृष्टवती – ''भवतः पिता तु दशभ्यः वर्षेभ्यः पूर्वमेव दिवं गतः। अद्य किमर्थं तस्मै कुप्यति भवान् ?'' इति।

''मातः ! यत् पूर्वं जातं तत् सर्वम् अपि भवत्या अवगतमेव। पितुः मित्रं नरसिंहः पञ्चदशभ्यः वर्षेभ्यः पूर्वम् अत्र ग्रामे स्थितं क्षेत्रादिकं विक्रीय नगरं प्रति गतः। तेन पिता अपि बोधितः आसीत् – 'भवान् अपि एवम् एव करोतु' इति। किन्तु मित्रस्य सूचनाम् अगणयन् पिता ग्रामे एव अवसत्। नरसिंहः तु नगरं गत्वा वाणिज्यं कुर्वन् प्रभूतं धनं सम्पादितवान्। अस्माकं तु शोचनीया स्थितिः यत् अल्पं क्षेत्रम् अस्ति ततः आगतेन आयेन अस्माभिः पञ्चभिः जनैः जीवनं यापनीयम्। पिता अपि यदि वाणिज्यम् अकरिष्यत् तर्हि वयम् एवं कष्टपरिस्थितिं न अनुभूतवन्तः स्याम'' इति उक्तवान् प्रतापः।

तदा दीर्घं निश्श्वस्य माता उक्तवती – ''एतत् सर्वं विधेः आधीनम्। भगवता यावत् दीयते तावता एव सन्तोष्टव्यम्'' इति। ''अम्ब ! अलं वैराग्ययुक्तैः वचनैः। नरसिंहस्य पुत्रः गोविन्दः अहं च समानवयस्कौ। सः सुखेन जीवति अद्य। सः अद्य नगरे मिलितवान्। नगरग्रामयोः मध्ये स्थिते अरण्ये निवसन्तम् ऋषिश्वरं द्रष्टुं शकटेन आगच्छन् आसीत्। मध्येमार्गं मां दृष्ट्वा सः प्रीत्या शकटे उपवेशितवान्। तस्य धनिकत्वं दृष्ट्वा स्वस्य निर्धनत्वं च स्मृत्वा अहं नितरां खिन्नः अस्मि'' इति स्वस्य दारिद्र्यविषये असहनां प्रकटयन् उक्तवान् प्रतापः।

पुत्रस्य कटुवचनानि श्रुतवती माता निर्वचना अभवत्। तस्यां रात्रौ पत्नी विमला पतिम् अवदत् – ''भवता अपि सः योगीश्वरः कुतो वा न द्रष्टव्यः ? कदाचित् तस्य अनुग्रहेण अस्माकं जीवने अपि परिवर्तनं जायेत'' इति।

प्रतापाय पत्न्याः एषा सूचना अरोचत। अतः सः परेद्यवि प्रातरेव ऋषिवरस्य दर्शनाय गतवान्। योगीश्वरः प्रतापं दृष्ट्वा प्रीत्या उक्तवान् – "पुत्र ! भवान् जीवने महत् दुःखम् अनुभवन् अस्ति इति भासते। का व्यथा बाधते भवन्तम् ?" इति।

तदा प्रतापः स्वस्य कष्टस्थितिं श्रावयित्वा दुःखेन उक्तवान् – "भवतः भक्तः गोविन्दः पूर्वम् अस्मद्ग्रामीणः एव आसीत्। तस्य पिता महाधनिकः आसीत्। अतः अद्य सुखेन जीवति सः। मम पिता मह्यं कामपि सम्पत्तिं न दत्तवान्। अतः अहं जीवने महत् कष्टम् अनुभवन् अस्मि" इति।

एतत् श्रुत्वा ऋषीश्वरः हसन् उक्तवान् –"जीवने चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च। भवतः पिता भवते कीदृशं धनं दत्तवान् इति भवता न ज्ञातम्। तेन दत्तम् अस्ति आरोग्यरूपं धनम्। अतः एव भवान् श्रमेण जीवनं कुर्वन् पूर्णोदरं भुङ्क्ते। भवतः गृहे सर्वेऽपि भवति प्रीतिमन्तः सन्ति। इतोऽपि श्रेष्ठं भाग्यं किमन्यत् स्यात् ? तथापि भवति असन्तोषः उत्पन्नः अस्ति मित्रस्य दर्शनात्। गोविन्दस्य विचारः सम्यग् ज्ञायते चेत् भवतः मनसि जातः असन्तोषः दूरं गच्छेत्" इति।

"कष्टं शब्दमात्रेणापि न जानाति सः। तस्य जीवनं सुखमयम्" इति उक्तवान् प्रतापः।

"वस्तुस्थितिः तथा नास्ति। सम्पदः प्राप्तेः अनन्तरं बहवः रोगाः तम् आवृण्वन्। मधुरं न खादनीयम्। लवणस्य उपयोगः न करणीयः। अधिकं दूरं चलितुमपि न शक्यते। वाणिज्ये जायमानेन परिवर्तनेन निद्रा अपि न प्राप्यते। औषधार्थं, मनश्शान्त्यर्थं च सः असकृत् अत्र आगच्छति। यदि भवता इष्यते तर्हि क्षणाभ्यन्तरे अहं भवन्तं कोटीश्वरं कुर्याम्। वर्तमानं शान्तं जीवनम् आवश्यकम् उत अशान्त्या युक्तं कोटीश्वरजीवनम् इति भवता एव निर्णयः करणीयः" इति वदता ऋषिश्वरेण स्वस्य हस्तः प्रतापस्य शिरसि स्थापितः। प्रतापस्य नेत्रे क्षणं पिहिते।

प्रतापः वृद्धः सन् भवनस्य एकस्मिन् प्रकोष्ठे पर्यङ्के शयानः अस्ति। भवने सर्वत्र सेवकाः। पुरतः मधुराणि फलानि, स्वादु भोजनं च। किन्तु श्रान्त्या सः उत्थातुमपि न शक्नोति। कष्टेन उत्थितः सः स्थातुम् अशक्नुवन् भूमौ अपतत्। साहाय्यार्थं तेन माता पत्नी च आहूते। ते सेवकं वदतः – 'तस्य साहाय्यं क्रियताम्' इति।

"मास्तु। मास्तु। एतादृशं जीवनम् अहं न इच्छामि" इति आक्रोशन् प्रतापः नेत्रे उद्घाटितवान्। पुरतः स्थितं हसन्तम् ऋषीश्वरं पश्यन् सः उक्तवान् – "भवान् मयि सद्बुद्धिम् उत्पादितवान्। कोटीश्वरस्य कष्टानि मह्यं न अपेक्षितानि। मम तु तादृशी पत्नी एव अपेक्षिता, या सुखे दुःखे च आधाररूपेण तिष्ठेत्। सा एव माता अपेक्षिता, या माम् इदानीं प्राणेभ्योऽपि अधिकं मनुते। तौ उभौ पुत्रौ एव भवतां, ययोः मुखदर्शनेन इदानीं मम सर्वा श्रान्तिः नष्टा भवति" इति।

"पुत्र ! सन्तृप्तिः, स्वास्थ्यम्, आनन्दः च जीवने सर्वदा भवेयुः। एतेषु असत्सु सम्पदां स्थित्या अपि न किमपि प्रयोजनम्। असूया सदा शापायते। मित्रस्य गोविन्दस्य दर्शनेन भवति असूया उत्पन्ना आसीत्। सौभाग्येन इदानीं सा अपगता। इतः परं भवान् गृहे सानन्दं वासं कर्तुम् अर्हति" इति उक्त्वा ऋषिश्वरः प्रतापम् आशीर्वादेन अनुगृहीतवान्। प्रतापः सविनयम् ऋषीश्वरं नमस्कृत्य सन्तुष्टः सन् गृहं प्रत्यागतः।

## नोऽद्वितीयं भारतम्

व्योम शाहः

(अनुवर्तते... )

यावन्तः जनाः भारते फिबोनाक्कीमहोदयं जानन्ति तेभ्योऽपि स्वल्पाः विरहाङ्कं जानन्ति । सः स्तोतव्यः छन्दशास्त्रज्ञः आसीत् । षष्ठशताब्द्यां यदा सः भारते ऊर्जयामास (जिजीव वा) तदा एकम् अद्वितीयम् अन्वेषणम् अकरोत् । सः छन्दबन्धारणेन एकां श्रेणिं रचयामास । यथाः ०,१,१,२,३,५,८,१३,२१,३२,५३... फिबोनाक्की अपि द्वादशम्यां शताब्द्याम् एनाम् एव श्रेणिं योजितवान् । अतः सा ''फिबोनाक्कीश्रेणि'' इत्येवं प्रसिद्धा । आयाहि, वयम् अद्य आरभ्य एनां श्रेणिं ''विरहाङ्कश्रेणि'' इति नाम्ना एव प्रसिद्धीकुर्मः ।

भारतीयाः तादृशाः प्रबुद्धाः आसन् यत् ते वाननिरक्षिण्याः ऋते एव सूर्य-चन्द्र-ग्रहादीनां परिभ्रमणस्य गणनां कृतवन्तः । भवन्तः पण्डिताः अतः तत् सर्व जानन्ति एव । यदि कथयामि ''तद् अपि सुकरम् अस्ति'' । तर्हि भुवि दुष्करं किम् ? दुष्करम् अणुसिद्धान्तः सूक्ष्मदर्शकयन्त्रेण विना । न अवगतम् ? प्रायः समस्त-विश्वः जोह्न-डाल्टन-महाशयम् अणुसिद्धान्तस्य संशोधकं मन्यते । तस्य समये तु सूक्ष्मदर्शकयन्त्रं किञ्चित् सुलभम् आसीत् । अहं तस्य वार्तां कर्तुन्नेच्छामि ।

खिस्तस्य पूर्व-षट्-शताब्द्यां कणादः ऋषिः निवसति स्म । वार्ता तत्कालस्य यदा पृथिव्यां सूक्ष्मदर्शकयन्त्रस्य कल्पना अपि नैव आसीत् । सः ऋषिः ''वैशेशिक-सूत्राणि'' विरचयाञ्चकार यस्मिन् अणुसिद्धान्ताः प्रदत्ताः सन्ति । एते सिद्धान्ताः जोह्नडाल्टनस्य सिद्धान्ताः इव सन्ति । न विश्वसिति ? समीक्षताम् –

| कणादः | जोह्न-डाल्टनः |
|---|---|
| तस्य कार्य्यं लिङ्गम् । ४।१।२॥<br>कारणभावात् कार्य्यभावः । ४।१।३॥ | (iii) Atoms are indivisible & indestructible.<br>(i) Smallest Unit of any matter is atom. |
| तत्पुनः पृथिव्यादिकार्य्यद्रव्यं त्रिविधं शरीरेन्द्रियविषयसंज्ञकम् । ४।२।१॥ | (ii) All elements are made up of basic units called atoms. |

इदानीं विश्वसिति वा ? वयं कस्मिंश्चिद् अपि देशे न निवसामः । अस्माकं भारतम् अद्वितीयं श्रेष्ठं च आसीत् अस्ति भविता च । पुरातनाः भूते सति वयं युवानः इति अस्माकं सौभाग्यम् । ईदृश्यः बहव्यः कथाः सन्ति येषां श्रवणेनैव वयं ''अहो ! अस्माकं भारतम् !'' अनुभवितुं शक्नुमः ।

इतः परं यदि वदामि तर्हि श्रूयताम् । भारते विमानानि, सुनम्यशस्त्रचिकित्सा, विमानस्थानकानि, गुरुत्वाकर्षणं, शून्यं, वास्तुशास्त्रं, रसायणविज्ञानं, धातुज्ञानं, चतुरङ्गं, रेखकं, दशमिकव्यवस्था, इत्यादिः आसीत् यत् शयनेऽपि अचिन्त्यम् अस्ति । श्रुत्वा ग्रैवेयम् उन्नीकरोतु । मोदतां यद् भवान् भारतीयः अस्ति । अपरं श्रूयताम् –

''भारतं मानुषाणां प्रेङ्खा, वाण्याः जन्मस्थानं, इतिहासस्य जननी, आख्यानस्य मातामही, संस्कृत्याश्च प्रमातामही । सर्वे श्रेष्ठाः मनुष्याः भारते एव कोशभूताः सन्ति'' इत्युवाच मार्कट्वैन्नः ।

''विश्वे कोऽपि ग्रन्थः इयद् हर्षणः ऊर्जास्रोतः च नास्ति यादृशाः उपनिषदः सन्ति'' एवम् अवदत् मैक्षमुल्लरः ।

''संस्कृतभाषायाः बन्धारणम् अनन्यं विद्यते । सा ग्रीकलेटीनाभ्यां परिनैष्ठिका । तस्माद् निपुणा काऽपि भाषा नास्ति जगत्यस्मिन्'' इत्यवोचत सरविल्लयमजोन्सः ।

''भवान् एतत् पठित्वा बहुहृष्टः एनं च भवान् भवतः मित्राणि ज्ञापयिष्यति'' इति उदितं भवतः/भवत्याः सेवकेन लेखकेन ।

**''ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान्प्रति नैष यत्नः ।**
**उत्पत्स्यते तु मम कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥''**

**– भवभूतिः ( मालतीमाधवम् )**

# मासवार्ता

## संस्कृत-साहित्य-रसास्वाद-व्याख्यानमाला




संस्कृत-साहित्य-अकादमी, गान्धिनगरम् एवं च संस्कृतविद्याप्रतिष्ठानम्, अहमदाबाद इत्यनयोः संयुक्तोपक्रमेण आरब्धायाः संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः षष्ठं व्याख्यानं फरवरीमासस्य २२ दिनाङ्के शनिवासरे 'अमदावाद-मेनेजमेन्ट-एसोशिएशन' इति स्थाने सम्पन्नम्। कार्यक्रमेऽस्मिन् डॉ. महेशः पटेलः (प्राध्यापकः, सर्वकारीविनयनमहाविद्यालयः, गान्धिनगरम्) "वाल्मीकेः रामायणं भासस्य रामायणदर्शनं च" इति विषये डॉ. पङ्कजः रावलः (प्राध्यापकः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः) "श्रीमद्भगवद्गीतायां गुरुशिष्यपरम्परा" इति विषये सुन्दरं व्याख्यानम् अकुरुताम्। उभयोः वक्त्रोः व्याख्यानं श्रुत्वा संस्कृतरसिकाः प्रसन्नाः आसन्। अत्र उल्लेखनीयं यत् अग्रिमं व्याख्यानं मार्चमासस्य १४ दिनाङ्के भविष्यति।

## संस्कृतम् अपठन् ताईवानदेशस्य योगशिक्षकाः



अहमदाबादनगरे शिवानन्दाश्रमे योगविषयम् अधिकृत्य अनेकाः प्रवृत्तयः प्रचलन्ति । पू. अध्यात्मानन्दस्वामिनः मार्गदर्शने प्रतिवर्षं 'Yog Teacher's Training Course' इति योगशिक्षकप्रशिक्षणवर्गः अपि प्रचलति। अस्मिन्नेव अभ्यासक्रमे ताईवानदेशस्थाः १२ योगशिक्षकाः प्रशिक्षणं प्राप्तवन्तः। अभ्यासक्रमेऽस्मिन् तेषां कृते संस्कृताध्ययनस्य व्यवस्थापि कल्पिता आसीत्। फरवरीमासस्य १६ दिनाङ्कतः २८ दिनाङ्कपर्यन्तं प्रतिदिनम् एकघण्टापर्यन्तं ते संस्कृतम् अपठन्। अत्र उल्लेखनीयं यत् योगशिक्षकप्रशिक्षणसमये संस्कृताध्ययनस्य इच्छा छात्रैः स्वयं प्रकटिता आसीत्। संस्कृतं पठित्वा सर्वे छात्राः प्रसन्नाः आसन्।

## कृपया हसन्तु

कश्चन भिक्षुकः कस्यचित् दातुः पुरतः द्वे भिक्षापात्रे अस्थापयत् । दाता एकस्मिन् धनं संस्थाप्य भिक्षुकम् अपृच्छत् - "एतत् द्वितीयं पात्रं किमर्थम् ?"

तत् श्रुत्वा भिक्षुकः अवदत् - "एषा मम द्वितीया शाखा अस्ति ।"

★ ★ ★ ★ ★

वर्गे छात्राणां टिप्पणीपुस्तकपरिशीलनसमये शिक्षकः रमणाय अकथयत् - "अहो आश्चर्यम् ! त्वम् एकाकी एव लेखने एतावतीः क्षतीः कथं कर्तुं शक्नोषि ?"

एतत् श्रुत्वा रमणः अवदत् - "एताः क्षतयः मम एकाकिनः न सन्ति । मम पितुः अपि अस्मिन् सहयोगः वर्तते ।"

★ ★ ★ ★ ★

रमणः - (नमनम् उद्दिश्य) भोः नमन ! तव माता यत् वदति तत् सर्वं करोषि त्वम् ?

नमनः - आम् । मम माता यत् वदति तत् सर्वम् अहं करोमि । न केवलं तावत् यत् वदति ततोऽपि अधिकम् एव करोमि ।

रमणः - तत् कथम् ?

नमनः - यदा मम माता वदति 'शीतके स्थापितस्य मिष्टान्नस्य अर्धम् एव खण्डं खादतु' तदा अहं सम्पूर्णं खण्डं खादामि ।

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**अपदो दूरगामी च साक्षरो न च पण्डितः ।**
**अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ॥**

अर्थः– पादौ न विद्येते चेदपि बहु दूरं गच्छति। अक्षरज्ञानं विद्यते चेदपि पण्डितः न। मुखरहितः चेदपि स्फुटं (स्पष्टम्) वक्तुं समर्थः अस्ति। किं तत्? इदं यः जानाति सः पण्डितः।

उत्तरम् – पत्रम्

**अपूर्वोऽयं मया दृष्टः कान्तः कमललोचने ।**
**शोऽन्तरं यो विजानाति स विद्वान्नात्र संशयः ॥**

अस्य श्लोकस्य भासमानः अर्थः, वास्तविकः अर्थः इति अर्थद्वयम्।

– हे सुन्दरि, अपूर्वं कान्तञ्च किञ्चन वस्तु मया दृष्टम्। मध्ये 'शो' इति विद्यते। इदं यः जानाति सः पण्डितः।

– हे सुन्दरि, आदौ अकारयुक्तम्, अन्ते ककारयुक्तं, मध्ये शोकारयुक्तञ्च वस्तु मया दृष्टम्। इदं यः जानाति सः पण्डितः।

उत्तरम् – अशोकः

**अस्थि नास्ति शिरो नास्ति बाहुरस्ति निरङ्गुलिः ।**
**नास्ति पादद्वयं गाढम् अङ्गमालिङ्गति स्वयम् ॥**

अस्थि नास्ति, मस्तकं नास्ति, बाहुः अस्ति किन्तु अङ्गुली नास्ति । पादौ न विद्यतः किन्तु शरीरं दृढम् आलिङ्गति। किं तत्?

उत्तरम् – युतकम्

## ज्ञानसरिता

**विमानयानेषु कृष्णपेटिका:** – यदा विमानापघातवार्ता श्रूयते तदा वयं प्राय: शृणुम: एव यत् 'कृष्णपेटिकाया:' अन्वेषणाय प्रयास: प्रचलति इति। का एषा कृष्णपेटिका नाम ? किं भवति अत्र ? विमानस्य अपघातस्य स्पष्टकारणस्य अन्वेषणे नितराम् उपकरोति एषा पेटिका। विमानेषु सर्वेषु अपि एतादृशं पेटिकाद्वयं भवति। एका विमानस्य वेगादीनाम् उल्लेखनं करोति निरन्तरम्। कोक्पिट्नामके स्थले स्थिता अपरा (सि.वि.सि. नामिका) पेटिका तत्रत्यं समग्रं सम्भाषणं ध्वनिमुद्रितं करोति। ३०-४० निमेषात्मिका: ध्वनिमुद्रिका: भवन्ति तयो: पेटिकयो:। यद्यपि तयो: पेटिकयो: नाम 'कृष्णपेटिका' इति, तथापि तयो: वर्ण: भवति शुभ्र: पीतवर्ण:, नारङ्गवर्ण: वा। अन्येभ्य: पार्थक्येन अभिज्ञानाय एष: वर्ण: उपयुज्यते तत्र।



**हम्मिङ्गपक्षी** –हऽऽम् इति शब्दं श्रुत्वा कश्चन कीट: आगत: इति मत्वा मा धावन्तु। शब्दोऽयं हम्मिङ्गपक्षिण:। प्राय: सर्वे पक्षिण: पक्षौ चालयन्त: पुरोगत्या गन्तुम् अर्हन्ति। किन्तु हम्मिङ्गपक्षिण: गति: तु सर्वतोमुखी। 'हेलिकोप्टर् यथा सञ्चरति तथा' एतस्य गति: वर्णयितुं शक्या। वामत:, दक्षिणत:, ऊर्ध्वभागे, अधोभागे, प्रतीपगत्या च स: उड्डयने समर्थ:। पुष्पेभ्य: मकरन्दं चूषन् कीट: इव गतिराहित्येन आकाशे स्थातुम् अपि शक्नोति अयम्। एतदर्थं तस्य पादौ नितराम् अनुकूलौ।

एष: प्रतिकलं (सेकण्ड) ५०-५६ वारान् स्वस्य पक्षौ चालयति प्राय:। केचन दक्षिणामेरिकीया: हम्मिङ्गपक्षिण: प्रतिनिमेषं ५००० वारान् पक्षं चालयितुं समर्था:। तादृशे अवसरे पक्षचालनं स्फुटतया न दृश्यते धूसरपट्टिका काचित् दृश्यते इव। एतादृशाय उड्डयनाय प्रभूता शक्ति: आवश्यकी। अत: एष: पक्षी प्रतिदशनिमेषम् आहारं सेवते। आदिनम् आहारं सेवमान: एव भवति स:।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **सान्निध्यम्** | निकटता | vicinity |
| **साफल्यम्** | सफलता | success |
| **सामग्र्यम्** | पूर्णता | totality |
| **सामञ्जस्यम्** | संगति | consistency |
| **सामि:** | आधा | half |
| **सामीप्यम्** | निकटता | vicinity |
| **साम्प्रतम्** | इस समय | now |
| **साम्यम्** | बराबरी | equality |
| **सायक:** | बाण | an arrow |
| **सायनम्** | रेखांश | longitude |
| **सारणम्** | भेजना | causing to go |
| **सारणि:** | एक छोटी नदी | a small river |
| **सारमेय:** | कुत्ता | a dog |
| **सारल्यम्** | सरलता | uprightness |
| **सारस:** | हंस | a swan |

## किं भवन्त: जानन्ति ?

**१) 'तिरुक्कुरल' इति प्रसिद्धस्य तमिलग्रन्थस्य रचयिता क: अस्ति ?**
(क) कम्ब: (ख) सुब्रह्मण्यम् (ग) तिरुवल्लुवर: (थ) मुदालियार:

**२) तमिलभाषायां रामायणस्य रचना केन कृता ?**
(क) जगन्नाथदासेन (ख) सरलादासेन (ग) कम्बनेन (घ) सुब्रह्मण्यमेन

**३) 'वाक्यपदीयम्' इति ग्रन्थस्य रचयिता क: वर्तते ?**
(क) पतञ्जलि: (ख) पाणिनि: (ग) भर्तृहरि: (घ) वेदव्यास:

**४) 'अष्टाध्यायी' इति ग्रन्थस्य रचनाकार: क: अस्ति ?**
(क) पाणिनि: (ख) पतञ्जलि: (ग) अश्वघोष: (घ) क्षेमेन्द्र:

**५) कथासरित्सागरस्य रचयिता क: वर्तते ?**
(क) सातवाहन: (ख) सेनापति: (ग) कृपाराम: (घ) सोमदेव:

**६) 'शृङ्गारशतकम्' इति ग्रन्थस्य रचयिता क: वर्तते ?**
(क) भामाह: (ख) भवभूति: (ग) भर्तृहरि: (घ) कालिदास:

**७) अमरुकशतकस्य रचयिता क: वर्तते ?**
(क) स्वयंभूदेव: (ख) बाणभट्ट: (ग) अमरुक: (घ) भानुदत्त:

उत्तराणि – (१) ग (२) ग (३) ग (४) क (५) घ (६) ग (९) ग

## अस्माकम् आगामिकार्यक्रमा:

"संस्कृतसाम्प्रतम्" मासिकस्य विषये पत्रक्रमाङ्क ४ अनुगुणं विवरणम्।

१. प्रकाशनस्थानम् - "एकलव्य संस्कृत एकेडेमी" कोरहाउस, ओफ सी.जी.रोड, परीमलगार्डन समीपम्, एलिसब्रिज, अमदावाद-६

२. प्रकाशनकाल: - मासिक:

३. मुद्रक: प्रकाशक :- मिहिर उपाध्याय: राष्ट्रियता - भारतीय:

४. सम्पादक: - मिहिर उपाध्याय: राष्ट्रियता - भारतीय:

संङ्केत: - 'एकलव्य संस्कृत एकेडेमी" कोर हाउस, ओफ सी. जी. रोड, परीमलगार्डन समीपम्, एलिसब्रिज, अमदावाद- ६

५. सदस्यनाम मिहिर उपाध्याय:, सम्पादक:

संङ्केत: - "एकलव्य संस्कृत एकेडेमी" कोरहाउस, ओफ सी.जी.रोड, परीमलगार्डन समीपम् एलिसब्रिज, अमदावाद- ६

अहं मिहिर उपाध्याय: घोषयामि यत्, उपरोक्ता: अंशा: नियमानुसारं योग्या: सन्ति।

दिनाङ्क: १/०३/२०२०

संस्कृत-
### साम्प्रतम्

नमस्कार:
यदि भवन्त: "साम्प्रतम्" मासिकीपत्रिकाया: ग्राहका: भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

# Admission Open

**Value Education Through Sanskrit**

## बालसंस्कारकेन्द्रम्
**(Class SKg to 4)**

## बालसंस्कृतवर्ग:
**(Class 5 to 8)**

**Date** : 13/06/20 to 10/04/21
**Day** : Saturday
**Time** : 5.30pm to 7.00pm
**Fees** : 5000/-

- **Venue** : Eklavya Sanskrit Academy
Core House, , Nr Parimal Garden,
Ellisbridge Ahmedabad
- **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

**प्रियवाचका:**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्या: लेखा:, कथा:, हास्यकणिका: वा सन्ति तर्हि कृपया प्रेषयन्तु।
- पत्रिकाया: विषये सूचनम् अपि स्वीकार्यम् अस्ति।

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006